श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेङ्कटेशतूणकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेङ्कटेशतूणकम् ॥

वज्रशङ्खबाणचापचिह्निताङ्घ्रिपङ्कजं
नर्तितायुतारुणाग्र्यनिस्सरत्प्रभाकुलम्।
वज्रपाणिमुख्यलेखवन्दितं परात्परं
सज्जनार्चितं वृषाद्रिसार्वभौममाश्रये ॥ 1 ॥

पञ्चबाणमोहनं विरिञ्चिजन्मकारणं
काञ्चनाम्बरोज्ज्वलं सचञ्चलाम्बुदप्रभम्।
चञ्चरीकसञ्चयाभचञ्चलालकावृतं
किञ्चिदुद्धतभ्रुवं च वञ्चकं हरिं भजे ॥ 2 ॥

मङ्गलाधिदैवतं भुजङ्गमाङ्गशायिनं
सङ्गरारिभङ्गशौण्डमङ्गदाधिकोज्ज्वलम्।
अङ्गसङ्गिदेहिनामभङ्गुरार्थदायिनं
तुङ्गशेषशैलभव्यशृङ्गसङ्गिनं भजे ॥ 3 ॥

कम्बुकण्ठमम्बुजातडम्बराम्बकद्वयं
शम्बराऱितातमेनमम्बुराशितल्पगम्।
बम्भरार्भकालिभव्यलम्बमानमौलिकं
शङ्खकुन्ददन्तवन्तमुत्तमं भजामहे ॥ 4 ॥

पङ्कजासनार्चितं शशाङ्कशोभिताननं
    कङ्कणादिदिव्यभूषणाङ्कितं वरप्रदम्।
कुङ्कुमाङ्कितोरसं सशङ्खचक्रनन्दकं
    वेङ्कटेशमिन्दिरापदाङ्कितं भजामहे॥ **5**॥

॥ इति श्रीवेङ्कटेशतूणकं समाप्तम्॥